# Contents


**Contents** i

**Title Page** iii

१ प्रथमः परिच्छेदः ॥ः प्रमाणसिद्धिः १

२ १. प्रमाणलक्षणम् २

३ २. भगवान् प्रमाणम् १८

४ द्वितीयः परिच्छेदःद्रष्टव्यं परिशिष्टं ।५ : प्रत्यक्षम् ११०

५ (१. प्रमाणसंख्याविप्रतिपत्तिनिरासः) ११०

६ (२. सत्यद्वयचिन्ता) ११२

७ (३. सामान्यतत्कल्यनानिरासः) ११२

८ ४. अनुमानचिन्ता १३२

९ ५. प्रत्यक्षचिन्ता १५४

१० (६. प्रत्यक्षभेदाः) १७६

११ ७. प्रत्यक्षाभासचिन्ता २०६

१२ ८. प्रमाणफलचिन्ता २१०

१३ ९. विक्षप्तिमात्रताचिन्ता २१६

१४ तृतीयः परिच्छेदः : स्वार्थानुमानं २८४

१५ १---हेतुचिन्ता २८४

१६ २ अनुपलब्धिचिन्ता २८५

१७ ३. शब्दचिन्ता ३४८

१८ ४. आगमचिन्ता ३५९

१९ ५. अपौरुषेयत्वे ३६३

२० चतुर्थः परिच्छेदःचतुर्थो व्याख्यायते । तत्र सम्बन्धमन्तरेण वाक्यार्थावृत्तेरिति तृतीयपरिच्छेदं व्याख्यायानेनोत्तरसम्बन्धं कथयन् प्रतिपर्तृसुखार्थमन्त्यपरिच्छेदे सर्वमेव शास्त्रशरीरमनुक्रमेण वृत्तिकृत् कथयति अनुमानमित्यादि ।ः परार्थानुमानं ४०६

२१ १. परार्थानुमानलक्षणम् (दिग्नागस्य) ४०६

### (२) हेयोपादेयवेदकत्वात् न तु सर्ववेदकत्वात्

...v.1.34 “ हेयोपादेयतत्त्वस्य साभ्युपायस्य वेदकः ।
यः प्रमाणमसाविष्टो न तु सर्वस्य वेदकः ॥३४ ॥ ”

तस्माद्धेयतत्त्वस्य दुःखसत्यस्य साभ्युपायस्य समुदय3सत्यान्वितस्योपादेयlb-तत्त्वस्य निरोधसत्यस्य साभ्युपायस्य मार्ग्गसत्यसहितस्य प्रमाणपरिशुद्धस्य यो lb-वेदकः स प्रमाणमिष्टो न तु सर्व्वस्य यस्य कस्यचिद्विवेदकः । न खलु सकलज्ञानादार्य-lbसत्यचतुष्टयदेशनाऽपि तु तज्ज्ञानत्वात् तदुपदेष्टृतयैव च प्रामाण्यमिष्यते ( ।३४)
§ 131

तदेवाह ॥ § 132
021/s

...v.1.35 “ दूरं पश्यतु वा मा वा तत्त्वमिष्टन्तु पश्यतु ।
प्रमाणं दूरदर्शी चेदेत गृध्रानुपास्महे ॥३५ ॥ ”

दू रं पश्यतु वा मा वा द्राक्षीत्तत्वमिष्टन्त्वार्यसत्यचतुष्टयं पश्यति तावतैव भग-lbवान् प्रमाणमन्यथाऽतत्त्वदर्श्यपि प्रमाणं दूरद4र्शी चेदिष्यते । एतागच्छत मुमुक्षवो lbगृध्रानुपास्महे दूरदर्शिनो दीर्घश्रुतीश्च ( ?न् च) वराहानित्युपहसति । उक्तमlbभिमतं प्रामाण्यं (३५) ॥ § 134

### (३) कारुणिकत्वात् प्रमाणम्

#### क. जन्मान्तरसिद्धिः

#### (करुणा जन्मान्तराभ्यासात्)

नन्वीदृशस्य प्रमाणस्य किं साधनमित्याह ( ।) § 135

...v.1.36 “ साधनं करुणाभ्यासात् सा बुद्धेर्देहसंश्रयात् ।
असिद्धाऽभ्यास इति चेन्नाश्रयप्रतिषेधतः ॥३६ ॥ ”

---

११ दू ] अतीन्द्रियं सर्व्वातीन्द्रियं ।
१३ श्रुती ] आकाशगान् तिरश्चः परचित्तानुसारिणः क्षणिकादीन् ।
१४ प्रामा ] पुरुषार्थज्ञत्वेन । यतः सत्यावबोधाद्धर्मचक्रादौ भगवान् सार्वज्ञं lbप्रतिज्ञातवात् ।

साधनं करुणा दुःखादुःखहेतोश्च समुद्धरणकामता करुणा सा भगवतः प्रामा Ib-ण्यस्य साधनं । सैव करुणा इत्यत आह । अभ्यासात्सा गौत्रविशेषात्कल्याणमित्र- Ibसंसर्गादनुशयदर्शनाच्च कश्चिन्महासत्त्वः कृ5पायामुपजातस्पृहः सा दरनिरन्तरा- Ibनेकजन्मपरम्पराप्रभवाभ्यासेन सात्मीभूतकृपया प्रेर्यमाणः सर्व्वसत्त्वानां समुदय Ib-हान्या दुःखहानाय मार्गभावनया निरोधप्रापणाय च देशनां कर्तुकामः स्वयमसाक्षा- Ibत्कृतस्य देशनायां विप्रलम्भसम्भावनाच्चतुरार्यसत्यानि साक्षात् करोतीति भगवति Ibसाधनं कृपा प्रामाण्यस्य । बुद्धेर्देहसंश्रयादसिद्धोऽभ्यास इति चेत् बुद्धिर्देहमाश्रिता Ibकार्य6त्वात् प्रदीपमिव प्रभा । शक्तिरूपत्वाद्वा मद्यमिव मदशक्तिः । गुणत्वाद्वा Ibप-टमिव शुक्लता । त्रेधाप्याश्रयविनाशे तस्य नाशात् । कुतो जन्मान्तराणि कथम्वा Ib-तेष्वभ्यासः कृपादेरिति चा र्व्वा काः । § 137

022/s

तदेतन्न युक्तमाश्रयप्रतिषेधतो बुद्धेः । बुद्धिरहितः कायो नाश्रयः Ibकारणत्वात् गु-णित्वात् शक्तिमत्त्वाद्वा ।(३६) § 138

## (क) भूतचैतन्यमतनिरासः[1]

### बीजपक्षनिरासः

### a. तत्र कारणत्वं प्रतिषेद्धुमाह ।

...v.1.37 “ प्राणापानेन्द्रियधियां देहादेव न केवलात् ।
सजातिनिरपेक्षाणां जन्म जन्मपरिग्रहे ॥३७ ॥ ”

....1.38a “ अतिप्रसङ्गात् ; ”

प्राणो वायुरूद्ध्वग तद्विपरीतोऽपानः इन्द्रियाणि चक्षुरादीनि । धीर्बुद्धिः7 Ibतासां
6a/MA सजातिनिरपेक्षाणां कारणभूतपूर्व्वसजातिप्राणादिपुञ्जनिरपेक्षाणां देहादेव Ib केवलान्न जन्म भवति ( ।) कुत इत्याह ( ।) जन्मपरिग्रहेऽति (प्र) सङ्गात् ( ।) Ibयदि महाभूतेभ्य एव केवलेभ्यः प्राणादीनां जन्मग्रहस्तदा सर्व्वस्माद् भवेयुIbरिति सर्वं प्राणिमयं जगत् स्यात् ( ।) न चास्त्येतत्तस्मात्पूर्व्वसजातिसापेक्षाणाIbमेवाक्षादीनां देहाज्जन्मेति पूर्व्व-जन्मप्रतिबन्धसिद्धिः ।(३७) § 140

....1.38b “ भाविजन्मपरम्परासिद्ध्यर्थमप्याह ( ।) ”

---

१. द्रष्टव्यं परिशिष्टं ।९,३७

---

३ सा ] वृत्तिस्तु निरुपद्रवभूतार्थस्वभाव-स्ये(प्र°१ ।२१२)त्यत्रोक्तो ।

११ ना ] कारणत्वेनाश्रयो न ।

$_{Ib}$प्रत्यक्षेण गृहीते वस्तुनि तद्व्यावृत्त्यनुकारिणो$_{3}$ विकल्पा (:) प्रत्यक्षदृष्टत्वेन $_{Ib}$धर्म्मिधर्म्मभावं व्यवस्थापयन्तीति प्रत्यक्षकृतः स उच्यते । न तु प्रत्यक्षप्रति$_{Ib}$भासमानत्वात् ।(२३१) § 1501

तथा हि ( ।) § 1502

....2.232 " ते कल्पिता रूपभेदाद् निर्व्विकल्पस्य चेतसः ।
न विचित्रस्य चित्राभाः कादाचित्कस्य गोचरः ॥२३२ ॥ "

ते धर्मिधर्मादयो रूपभेदाद् बुद्ध्याकारविशेषा विजातीयव्यावृत्त्याश्रयेण $_{Ib}$कल्पिता विचित्राभा वस्तुबलभावित्वात् कादाचित्कस्य विचित्रस्य धर्म्मि$_{Ib}$धर्म्मभेदप्रतिभासरहितस्य निर्व्विकल्पस्य चेतसः प्रत्यक्षस्य न गोचरः । प्रत्यक्षं $_{Ib}$हि वस्तुसामर्थ्योत्पन्नं तदाकारमनुकुर्यात् न विकल्पितं ।(२३२) § 1504

### (ख) शब्दविकल्पविषयः सामान्यम्

$_{Ib}$

भवतु$_{4}$ वा वस्त्वेव सामान्यं तथापि नासौ शब्दविकल्पविषय इत्याह ( ।) § 1505

....2.233 " यद्यप्यस्ति सितत्वादि यादृगिन्द्रियगोचरः ।
न सोभिधीयते शब्दैर्ज्ञानयो रूपभेदतः ॥२३३ ॥ "

यद्यपि सितत्वादि सामान्यमस्ति पटादौ धर्म्मिणि यादृक् सितत्वादिविशदा$_{Ib}$कार इन्द्रियस्य गोचरः । स इन्द्रियज्ञानगोचरोऽर्थोऽभिधीयते न शब्दैः । ज्ञानयोरिन्द्रियशब्दजनितयो रूपस्याकारस्य स्फुटास्फुटत्वेन भेदतः (२३३) § 1507

....2.234 " एकार्थत्वेपि बुद्धीनां नानाश्रयतया स चेत् ।
श्रोत्रादिचित्तानीदानीं भिन्नार्थानीति तत्कुतः ॥२३४ ॥ "

बुद्धीनामिन्द्रियशब्दजनितानामेकार्थत्वे एकविषयत्वेपि नानाश्रयतया कारण-
190/s भेदात्मकस्य आकारभेदश्चेत् । इ$_{5}$दानीमेवं स्थितौ श्रोत्रादीन्द्रियचित्तानि भिन्नार्थानि
शब्दरूपगन्धादिभिन्नविषयाणीति व्यपदिश्यके (।) तत्कुतः प्रमाणादव$_{Ib}$धारितं । तान्यपि चितान्यभिन्नविषयत्वेपीन्द्रियाणामाश्रयभूतानां भेदाद् भिन्ना$_{Ib}$काराणीति किन्न कल्प्यते ।(२३४) § 1509

किञ्च (।) § 1510

---

८ का ] कादाचित्कत्वादर्थसन्निधिसापेक्षत्वमाहान्यथा कल्पितधर्मभेदज्ञेयत्वादि$_{Ib}$विषयत्वे सर्व्वदा स्यात् । एतेन सामान्यं वस्तुसत्प्रतिषिद्धं ।

१९ वि ] सामान्यमात्र ।
१९ नानाश्र ] चक्षुरादिमनसी ।

न हि वस्तुनो व्यावृत्तिर्व्वस्तु भवितुमर्हति । अस्मादेव वृक्षादस्य वृक्षस्य भेद इतीरणाद् विकल्पनात् भेदस्य वस्तुत्वे भिद्यमाना शिंशपैव वा भेदः $_{1b}$स्याद् वस्त्वन्तरं$_{5}$ वा । न तावच्छिंशपा धवादेरवृक्षाद् भेदाभावप्रसङ्गात् । न हि $_{1b}$शिंशपास्वभावलक्षणो भेदो धवादेरस्ति येन तेप्यवृक्षस्य भेदाः स्युः ॥ § 2668

सर्व्वत्र एव हि भिद्यमानाभावास्तदात्मन इति चेत् । न तर्ह्येको भेदस्तत्का$_{1b}$रिणामतत्कारिभ्यो यः शब्दवाच्यः । व्यक्तिस्वभावस्य तु भेदस्य संकेताविषयत्वा$_{1b}$दवाच्यतैव । अथ वस्त्वन्तरं भेदस्तदा तस्माद् भेदाख्या (ना) द् वस्त्वन्तराद् $_{1b}$भिद्य$_{6}$मानस्य शिंशपादेर्भेदो वक्तव्यः अन्यथा वस्त्वन्तरत्वायोगात् । एवञ्चा$_{1b}$वृक्षव्यावृत्तेर्द्वयावृत्तत्वात् शिंशपादिरवृक्षः कर्कादिवत् । भेदस्य च वृक्षाद् भिन्नत्वं $_{1b}$भेदान्तरोपाधिकमेवेति द्रव्यान्तरवर्णभेदः स्यात् । न ह्यन्योन्यस्य भेदः सम्बन्धा$_{1b}$भावेनातिप्रसङ्गात् । सति सम्बन्धे कार्यकारणभाव एवासौ । ततः सर्व्वं कार्यं $_{1b}$ स्वकारणस्य भेदः (व्यावृत्तिः) 66a/MA
स्यात् ।* तस्माद् योऽयं भे$_{7}$दः शब्दव्यवहारविषयो$_{1b}$ऽनुयायी स कल्पितोऽपरमार्थः । स्वस्वभावव्यवस्थितास्तु भावाः पारमार्थिको भेदः ॥ § 2669

ननु यदि वस्त्वेकरूपं तदैकेन शब्देन लिङ्गेन वा वस्तुनि प्रतिपादिते $_{1b}$शब्दप्रमाणान्तरवृत्तिर्न स्यात् ॥ § 2670

...3.128b “ एकार्थश्लेषविच्छेद एको व्याप्रियते ध्वनिः ॥१२८ ॥ ”

...3.129a “ लिङ्गं वा तत्र विच्छिन्नं वाच्यं वस्तु न किञ्चन । ”

एकस्य नित्यत्वादेरर्थस्य श्लेषः सम्बन्धस्तस्य विच्छेदे व्यावृत्तावेको ध्वनि- र्लिङ्गं 333/s
वा व्याप्रियते । तत्र ध्वनौ लिङ्गे वा विच्छिन्नं सर्व्वतो व्यावृत्तं न किञ्चन $_{1b}$वाच्यम$_{1}$स्ति एका व्यावृत्तिः शब्देन लिङ्गेन वा प्रतिपाद्यते न वस्त्वित्यर्थः । § 2671

...3.129b “ यस्याभिधानतो वस्तुसामर्थ्यादखिले गतिः ॥१२९ ॥ ”

...3.130a “ भवेन्नानाफलः शब्द एकाधारो भवत्यतः ॥ ”

---

१ व्यावृ ] अभिन्ना वाऽवृक्षाद् वृक्षस्य भिन्ना वा उभयथापि दूषणमाह निवृत्तिररूपत्वेना$_{1b}$बुद्धत्वात् सङ्केतावृत्तेश्च न शब्दविषयत्वमनुभवात्तु वृक्षोयं नावृक्ष इति निश्चय ( : ।) $_{1b}$तेनान्यनिवृत्तिः प्रतिषेधविकल्पेन कल्पितावृक्षादौ च वृत्तेः शब्दोन्यनिवृत्तमाक्षि$_{1b}$पति । तेनान्यनिवृत्तिविशिष्टत्वमुक्तमाचार्येण ।
८ पादेर्भेदो ] भेदशिंशपयोर्मध्येऽपरः ।
१२ * ] अतदो व्यावृत्तिस्तेनैवं न चैवं तद्भेदाभिमतेपि मा भूत् ।
१४ स्त्वेक ] पूर्व्वयुक्त्या न व्यतिरिक्ता व्यावृत्तिर्नापि सामान्यं ।
१४ तिपादिते ] अखण्डे स्वीक्रियमाणे तस्माद् यो येन धर्मेणेत्युक्तेपि प्रागधिकविधानायाह $_{1b}$( ।) अ ( ?आ) कारान्तरसमारोपोत्र ( ?) श्लेषः ( ।) स च प्रतिपत्तिभेदेनानेकः ।
१८ व्यावृत्ता ] बुद्धिप्रतिभासिनि धर्मिणि बाह्यभिन्नतयाध्यस्ते शब्दस्य ( ?मा) त्रेण वृत्तेरिति $_{1b}$तत्राभिप्रायः ।
१९ ते ] स्वार्थाभिधाद्वाराऽरोपखण्डेन शब्दप्रमान्तरसाफल्यमित्यर्थः ।

अत्राह सत्यमेतत् केचित्तु वादिनो धर्मिणः केवलस्योपरोधे साध्य-$_{2}$ धर्मस्याबाधायामपि पक्षस्य दोषवत्तामुपागताः प्रतिपन्नाः ।(१४०) [§ 3561]

....1.141 “ यथा परैरनुत्पाद्यापूर्व्वरूपन्न खादिकम् ।

सकृच्छब्दाद्यहेतुत्वादित्युक्ते प्राह दूषकः ॥१४१ ॥ ”

यथा परैः सहकारिभिरनुत्पाद्यापूर्व्वरूपं न खादिकमाकाशदिक्कालादि $_{1b}$न भवति । अपि तूत्पाद्यपूर्व्वरूपमेव भवति । सकृदेककालन्तदुत्पाद्यस्य कार्य$_{1b}$कालपस्य शब्दादेरहेतुत्वादविशिष्टैकरूपात् कारणात् सकृत् सर्व्वकार्योत्पत्ति$_{1b}$प्रसङ्गादिति वादिनोक्ते दूषकः प्रतिवाद्याह ।(१४१) [§ 3563]

....4.142 “ तद्वद् वस्तुस्वभावोऽसन् धर्मी व्योमादिरित्यपि ।

नैवमिष्टस्य साध्यस्य बाधा काचन विद्यते ॥१४२ ॥ ”

तद्वद्यथानुत्पाद्यापूर्व्वरूप आकाशादिर्न$_{5}$ भवति ।* तथा वस्तुस्वभावो धर्मी $_{1b}$-व्योमादिरसन्नित्यपि स्यात् । अर्थक्रियाऽसमर्थस्य वस्तुत्वाभावादिति धर्मिणः $_{1b}$केवलस्य बाधनं न धर्मस्य । एवं धर्मिबाधनेपीष्टस्य साध्यस्य काचन बाधा न $_{1b}$विद्यते । हेतोर्व्वाऽसिद्धिः । असत्यपि कार्यानुत्पादस्य व्यवच्छेदस्य सिद्धेः ।(१४२) [§ 3565]

ततः ( ।) [§ 3566]
462/s

....4.143 “ द्वयस्यापि हि साध्यत्वे साध्यधर्मोपरोधि यत् ।

बाधनं धर्मिणस्तत्र बाधेत्येतेन वर्णितम् ॥१४३ ॥ ”

द्वयस्य धर्मिधर्मसमुदायस्यापि हि साध्यत्वे सति यत्र धर्मिणो बाधनं साध्य$_{1b}$धर्मोपरोधि तत्र पक्षबाधा युक्तेत्येतेन स्वध$_{4}$र्मिग्रहणेन वर्ण्णितं । न हि साध्य$_{1b}$धर्ममात्रसाधनार्थं कश्चित् साधनमन्वेषते । तस्य जगति क्वचित् सत्तायां विवा$_{1b}$दाभावात् । तथा निश्चये प्रवृत्त्ययोगाच्च । किन्तु धर्मिविशेषनिष्ठं साध्य$_{1b}$मिष्टं ॥(१४३) [§ 3568]

...4.144a “ तथैव धर्मिणोप्यत्र साध्यत्वात् केवलस्य न ।

यद्येवमत्र बाधा स्यात् ; ”

१ वादिनो ] यत्र धर्मिबाधेपि साध्यस्य न क्षतिः तत्रापि दोषः ।
५ कारि ] वै शे षि (कं) प्रति सौ त्रा न्ति केन ।
५ रूपं ] न क्षतस्वभावमिति साध्यं धर्मी ।
६ स्य ] शब्दहेतुराकाशं तद् यदि नित्य एकदोत्पत्तिप्रसङ्गः सदा सन्निधानात् हेतोः ।
८ तिवाद्याह ] विरुद्धतां ।
११ * ] वस्तुस्वभाव आकाशादिर्द्धर्मो न वेति विवक्षामनङ्गीकृत्याकाशसत्त्ववादिना सौ त्रा न्ति के न सामान्येन प्रकृते आकाशादौ स्थिररूपत्वधर्मव्यवच्छेदमात्रे साध्ये युगपद्धेतुत्वव्यवच्छेदरूपे हेतौ यद्याह परः वस्तुभूताकाशाभावं । तादृशे निराकृतेपि नैवेष्टस्य व्यवच्छेदमात्रस्य बाधा प्रज्ञप्तिमति धर्मिणि व्यवच्छेद मात्रस्याव्याघातात् ।

....4.245 “ यन्नान्तरीयकः स्वात्मा यस्य सिद्धः प्रवृत्तिषु ।

निवर्त्तकः स एवातः प्रवृत्तौ च प्रवर्त्तकः ॥२४५ ॥ ”

यस्य स्वात्म(ा) स्वभावो यन्नान्तरीयकः यदन्वयव्यतिरेकानुविधायी प्रतिबन्ध-
500/s $_{Ib}$ कस्य वह्न्यादेः प्रवृत्तिषु वि$_{6}$धिषु सिद्धः । स एव निवर्त्तमानः तस्यानुविहितान्व-
य$_{Ib}$व्यतिरेकस्य निवर्त्तकः । अतः प्रवृत्तिविषयत्वात् प्रवृत्तौ स्वसत्तायाञ्च तस्यावश्यं
$_{Ib}$प्रवृत्तेः कर्त्ता हेतुर्भवति । यथा धूमो दहननान्तरीयकतया सिद्धो दहननिवृत्तिप्र$_{Ib}$-
वृत्तिभ्यां निवर्त्तते प्रवर्त्तते च ( ।२४५ ) [§ 3852]

....4.246 “ नान्तरीयकता सा च साधनं समपेक्षते ।

कार्ये दृष्टिरदृष्टिश्च कार्यकारणता हिता ॥२४६ ॥ ”

सा च नान्तरीयकता साधनं निश्चायकं मानमपेक्षते गमकत्वहेत्वधिकारे$_{Ib}$-
102b/MA ऽनिश्चितगम$_{7}$कत्वनिबन्धस्याहेतुत्वात् । साधनञ्च कार्ये कारणान्वयवति दृष्टि$_{Ib}$स्तद्व्य-
तिरेकवति चादृष्टिः । न तु सपक्षविपक्षयोर्दर्शनादर्शनमात्रकं । हि यस्मात् $_{Ib}$तत्कार्य-
दृष्ट्यदृष्टी कार्यकारणता कारणभावाभावप्रयुक्ते कार्यभावाभावदर्शने कार्य$_{Ib}$कारणतोक्ता
( ।) अन्यनिश्चयोपायतादर्शनार्थं ।(२४६) [§ 3854]

ततश्च ( ।) [§ 3855]

...4.247a “ अर्थान्तरस्य तद्भावेऽभावानियमतोऽगतिः । ”

अकारणस्यार्थान्तरस्यात्मनस्तस्य प्राणादेर्भावेऽभावानियमतोऽवश्यम्भावा$_{Ib}$-भावात् अगतिरप्रतीतिः । [§ 3856]

नन्वात्मा$_{1}$न्वयव्यतिरेकानुविधानात् प्राणादय आत्मानं तत्कार्यतयानुमाप$_{Ib}$यिष्य-न्तीत्याह । [§ 3857]

...4.247b “ अभावासम्भवात् तेषामभावे नित्यभाविनः ॥२४७ ॥ ”

तस्यात्मनो नित्यभाविनः सर्व्वकालस्थायिनः कदाचिदभावे सति तेषां प्राणा-$_{Ib}$दीनामभावस्यासम्भवात् ( ।) यदि व्यतिरेकमन्तरेणान्वयमात्रादात्मकार्यता $_{Ib}$-प्राणादीनां तदा कालाकालादिकार्यतापि स्यात् ( ।) या यस्य समानत्वात् ( ।) $_{Ib}$-ततश्च तानप्यनुमापयेयुः कालादिनिवृत्तिश्च प्राणादिनिवृत्त्या व्या$_{2}$प्यते । ततो $_{Ib}$यत्र प्राणादिनिवृत्तिरस्ति तत्र कालादिनिवृत्तिरपि स्यात् । एवं व्याप्यसद्भावात् । $_{Ib}$न च कालरहितः कश्चिदस्ति ।(२४७) [§ 3858]

**(६) क. सामग्रीशक्तिभेदाद् विश्वरूपता**

३ कः] लिङ्गं धूमादिः ।

